ऑनलाइनसंस्कृतप्रशिक्षणकेन्द्रद्वारा प्रस्तावितः

# त्रैमासिकः संस्कृतसम्भाषणप्रशिक्षणपाठ्यक्रमः

# (सर्टिफिकेट कोर्स)

## संपूर्णानन्द संस्कृत विश्वविद्यालयः, वाराणसी



*** समन्वयकः ***

**डॉ. रविशंकर पाण्डेयः**

**सह - समन्वयकः**

1. डॉ. राजा पाठकः
2. डॉ. मधुसूदन मिश्रः
3. [illegible]

# उद्देश्यम्

**संस्कृतभाषा संवादभाषा भवेत्, अधिसंख्यजनाः संस्कृतसम्भाषणे दक्षाः भवेयुः तदर्थम् आधुनिक-यन्त्रमाध्यमेन सुगमविधिना उत्तरप्रदेशशासन-निर्देशानुगुणं संस्कृतभाषा-दक्षप्रशिक्षकैः संपूर्णानन्दसंस्कृतविश्वविद्यालयेन च त्रैमासिकं संस्कृतभाषाप्रमाण-पत्रीयं (सर्टिफिकेट कोर्स) - पाठ्यक्रमप्रशिक्षणं सङ्कल्पितम् अस्ति | संकल्प- संपूर्त्तये पञ्चचत्वा-रिंशत् होरात्मकाः विषयविन्दवः चिताः सन्ति |**

**तथा च -**

**नगरे नगरे ग्रामे ग्रामे विलसतु संस्कृतवाणी ,**
**सदने सदने जन-जन-वदने जयतु चिरं कल्याणी।**
**सत्यशीलसौन्दर्यसमीरा ज्ञानजला गतिसारा ,**
**छलछलकलकल प्रवहतु दिशि दिशि पावनसंस्कृतधारा ।।**

# पाठ्यक्रमसंरचना

**सर्टिफिकेट-संस्कृतसम्भाषण-पाठ्यक्रमः त्रैमासिकः सञ्चालितो भविष्यति। अस्मिन् त्रैमासिके पाठ्यक्रमे पञ्चचत्वारिंशत् होरात्मकाः पाठ्यविन्दवः संरचिताः सन्ति। अस्य पाठ्यक्रमस्य चत्वारि प्रश्नपत्राणि, प्रतिप्रश्नपत्रं शतं (100) पूर्णाङ्काः, उत्तीर्णाङ्काः षड्त्रिंशत् (36) निर्धारिताः विद्यन्ते।**

# प्रथमं प्रश्नपत्रम्

सर्टिफिकेट-संस्कृतसम्भाषणपाठ्यक्रमस्य त्रैमासिकस्य प्रथमे प्रश्नपत्रे शब्दपरिचयः, क्रियापदपरिचयः, वाक्यनिर्माणञ्च त्रयः प्रमुखाः पाठ्यविन्दवः वर्तन्ते । प्रशिक्षकाः अध्यापने मुख्यरूपेण परिवेशीयान् संज्ञाशब्दान्, क्रियाशब्दाञ्च पाठयिष्यन्ति, परिवेशीयशब्दैः छात्राः सुपरिचिताः प्रकृत्या भवन्ति । अस्य प्रश्नपत्रस्य पाठनकालः दशहोरात्मकः ।

## प्रथमं प्रश्नपत्रम् पूर्णाङ्काः 100 होरात्रयम्

## विषयः- पाठनकालांशः

### 1. शब्दपरिचयः (परिवेशीयाः शब्दाः) – चतुर्होरात्मकः

(क) सुबन्ततिङन्तपदपरिचयः यथा (गजः, अश्वः , बालकः , मोहनः , वदति , खादति , लिखति) | (एकहोरात्मकः)

(ख) सम्बन्धबोधकाः शब्दाः यथा (माता-पिता,भ्राता-भगिनी, पति-पत्नी) | (एकहोरात्मकः)

(ग) दिनचर्या-शब्दाः यथा (प्रातः जागरणम् , रात्रौ शयनम् , दन्तधावनम् , मुखप्रक्षालनम्) | (एकहोरात्मकः)

(घ) गृहवस्तु यथा (मार्जनी, तुला, मञ्जूषा, घटीयन्त्रम् , छत्रम्) | (एकहोरात्मकः)

### 2. क्रियापदपरिचयः (परिवेशीयाः क्रियाशब्दाः) – होरात्रयः

लट्-लृट्-लङ्लकारेषु क्रियापदानां परिचयः प्रचलिताः दशधातवः (भू-पठ्-गम्-स्था, पा, लिख्, शीङ,दृश्य, याच् - वद्) (प्रतिलकारम् एकहोरात्मकम्)

यथा- (भवति , भविष्यति , अभवत्)|

### 3.वाक्यनिर्माणम् होरात्रयम्

सुबन्तेन ` (एकहोरात्मकम्)

तिङन्तेन (एकहोरात्मकम्)

प्रश्नवाचकेन (एकहोरात्मकम्)

(क) सुबन्ततिङन्तपदं संयोज्य संवादात्मकं वाक्यम् । यथा –(मम नाम मोहनः, तव नाम किम् ? मोहनः पठसि, त्वं किं करोषि ?) |

**संदर्भग्रन्थाः** - (धातुरूपावली,शब्दरूपावली,संस्कृतवाक्यसंग्रह-सार्वभौमसंस्कृतप्रचारसंस्थानस्य)|

# द्वितीयं प्रश्नपत्रम्

**अस्य पाठ्यक्रमस्य द्वितीये प्रश्नपत्रे विभक्तिप्रयोगपरिचयः लकार-प्रयोगपरिचयः- अव्यय-सर्वनाम-शब्दपरिचय इति त्रयः पाठ्यविन्दवः अध्यापनीयाः सन्ति, वाक्ये सुबन्त-तिङन्त-अव्यय-सर्वनाम-शब्दाः मुख्यरूपेण समुपलभ्यन्ते | तेषां परिज्ञानं संस्कृतभाषासंभाषणे महत्त्वपूर्णं भवति | अस्य प्रश्नपत्रस्य पाठनकालः दशहोरात्मकः |**

**द्वितीयं प्रश्नपत्रम्- पूर्णाङ्काः(100) होरात्रयम्**

**विषयः- पाठनकालांशः**

**1. विभक्तिप्रयोगपरिचयः- (त्रिहोरात्मकः)**

प्रथमा-पञ्चमी (एकहोरात्मकः)

षष्ठी-सप्तमी (एकहोरात्मकः)

(क) सप्तविभक्तयः - सप्तविभक्तिं योजयित्वा-----राम-हरि-गुरु-नदी शब्दरूपं प्रशिक्षणीयम् |

**2. लकारप्रयोगपरिचयः- (होरात्रयः)**

(क) लट्-लिट्-लङ्लकारेषु क्रियापदानां प्रयोगपरिचयः- (प्रतिलकारम् एकहोरात्मकम्)

यथा -----------------------------------(मोहनः गच्छति , मोहनः गमिष्यति , मोहनः अगच्छत्)|

**3. अव्यय-सर्वनाम-शब्दपरिचयः- (पञ्चहोरात्मकः)**

(क) स्थान-काल-प्रकारवाचकाः अव्ययशब्दाः--- यथा (कुत्र , तत्र , अत्र, ह्यः) (प्रतिविषयं एकहोरात्मकम्)

(ख) तत्, अस्मद् युस्मद्, एतत्, किम्, भवत् प्रभृतयः सर्वनामशब्दाः । (द्विहोरात्मकाः)

विशेषः - सुबन्त-तिङन्तपदैः अव्ययशब्दैश्च लघुवाक्यनिर्माणं विधाय संस्कृतसम्भाषणं प्रशिक्षणीयम् |

**सन्दर्भग्रन्थः -** रचनानुवादकौमुदी- (कपिलदेव द्विवेदिनः)|

# तृतीयं प्रश्नपत्रम्

**अस्मिन् तृतीये प्रश्नपत्रे प्रत्ययप्रयोगपरिचयः, शतृ-क्तवतुप्रत्ययान्त-शब्दरूपपरिचयः, वाच्यपरिवर्तनं संख्यावाचक शब्दव्यवहारः त्रयः पाठ्यविन्दवः निर्धारिताः सन्ति | वाक्यनिर्माणे संभाषणे वा कृत्प्रत्ययानां प्रयोगः सुगमः भवति तिङन्तपदस्य प्रयोगापेक्षया | वाक्ये संभाषणविस्ताराय वाच्य परिवर्तनमपि प्रशिक्षणीयमस्ति |**

**विशेष :-** (1) सुगमाः संज्ञा शब्दाः, क्रियाशब्दाः संख्यावाचकाः उपपद विभक्तिशब्दाः (सह, बिना, अभितः, परितः, नमः) क्रीडायां प्रयुक्तशब्दाः, प्रशिक्षकः, पाठनकाले व्यवहरणीयाः । व्याकरणस्य नियमाः अपेक्षिताशेत् तदेव पाठनीयाः । व्यवहार पक्षः प्रमुखः- पाठने नियमपक्षः गौणः एतेन संप्रेषणविधिः सुगमः बोधगम्यश्च भवति ।

## तृतीयं प्रश्नपत्रम्- पूर्णाङ्काः(100) होरात्रयम्

**विषयः-** **पाठनकालांशः**(दशहोरात्मकः)

### 1. प्रत्ययप्रयोगविधिः- (चतुर्होरात्मकः)

(क) तव्यत्, अनीयर्, क्त्वा, ल्यप्, ल्युट्, क्त, क्तवतु, तुमुन् शतृ-प्रत्ययान्तशब्दपरिचयः | **(द्विहोरात्मकः)**

यथा (पठनीयम् , पठित्वा , पठितवान् , पठितुम्)|

(ख) एषां प्रत्ययान्तशब्दानां वाक्याभ्यासः **(द्विहोरात्मकः)**

### 2. क्त-शतृ-क्तवतुप्रत्ययान्त-शब्दरूपपरिचयः - (त्रिहोरात्मकः)

(क) पुरुषवचनानुगुणम् (प्रति प्रत्ययम् एकहोरात्मकम्)

### 3. वाच्यपरिवर्तनम् – (त्रिहोरात्मकम्)

(क) कतृ-कर्म-भाव वाच्यवाच्यं | (वाच्य परिवर्तने कृत्प्रत्ययाः अपि व्यवहरणीयाः) (प्रतिवाच्य एकहोरात्मकम्)

यथा -(सः पठति , ग्रन्थः पठितव्यः , मया पठनीयं, तेन भूयते)|

(ख) संख्यावाचक शब्द व्यवहारः

**संदर्भग्रन्थाः-** शब्दरूपावली,लघुसिद्धान्तकौमुद्याः कृदन्तप्रकरणम्, रचनानुवादकौमुदी|

# चतुर्थं प्रश्नपत्रम्

**अस्य पाठ्यक्रमस्य चतुर्थे प्रश्नपत्रे अबाधगत्या संस्कृतसंभाषणार्थं सूक्ति-श्लोक-कथा-नीति पद्यानां समावेशः कृतो विद्यते | सम्भाषणे प्रशिक्षकाः प्रचलित- सूक्तीनां सरलश्लोकानाञ्च अर्थबोधम् उच्चारणविधिञ्च शिक्षयिष्यन्ति | गीतायाः,मूलरामायणस्य श्लोकाः, पञ्चतंत्रस्य कथा, चाणक्यस्य नीतिपद्यानि पाठनीयाः प्रदत्तानि उदाहरणानि अन्यान्यपि पाठितव्यानि | अस्य प्रश्नपत्रस्य पाठनकालः पञ्चदशहोरात्मकः ।**

## चतुर्थं प्रश्नपत्रम्- पूर्णाङ्काः(100) (होरात्रयम्)

**विषयः-** **पाठनकालांशः**

**(क)सूक्तिः-** (होरात्रयी)

यथा (सत्यमेव जयते , एकोऽहं वहुस्याम् , वसुधैव कुटुम्बकम्)|

**(ख)श्लोकः-** (होरात्रयः)

यथा- त्वमेव माता च पिता त्वमेव , त्वमेव बन्धुश्चसखा त्वमेव |

त्वमेव विद्या द्रविणं त्वमेव , त्वमेव सर्वं मम देव देव ||

**(ग) कथा-** (पञ्चहोरात्मिका)

**(घ) नीतिपद्यम्-** (चतुर्होरात्मकम्)

**संदर्भग्रन्थाः-** यथा- चाणक्यनीतिः, विदुरनीतिः, पञ्चतन्त्रम् अन्ये ग्रन्थाः अपेक्षिताश्चेत् संग्रहणीयाः |

## 1. संस्कृत भाषा प्रशिक्षण

| | | | | |
|---|---|---|---|---|
| 1. | डॉ. मनमोहन तिवारी | एसोसिएट प्रोफेसर<br>रज्जू भैय्या विश्वविद्यालय<br>प्रयागराज | 8805095519 | manmohan03071973@gmail.com |
| 2. | डॉ. रत्नेश कुमार त्रिवेदी | विभागाध्यक्ष, व्याकरण विभाग<br>श्री वामदेव सं.म.वि. बाँदा | 7355026272 | trivediratneshbhu@gmail.com |
| 3. | डॉ. सूर्यकान्त त्रिपाठी | सहायक आचार्य, संस्कृत विभाग दीनदयाल उपाध्याय गोरखपुर विश्वविद्यालय, गोरखपुर | 6393200449 | suryakanttripathi4@gmail.com |
| 4. | डॉ. विजेन्द्र कुमार आर्य | सहायक आचार्य, व्याकरण विभाग, सं.सं.वि.वि., वाराणसी | 8700156167 | vijendrakumararya@gmail.com |
| 5. | डॉ. महेश द्विवेदी | सहायक आचार्य, एकरसानन्द आ.स.म.वि. मैनपुरी | 942308402 | maheshd942@gmail.com |
| 6. | डॉ. प्रांगेश मिश्र | वेदान्त विभागाध्यक्ष श्री गोरखनाथ संस्कृत विद्यापीठ गोरखपुर | 8858861353 | prangeshkumarmishra@gmail.com |
| 7. | डॉ. शैलेन्द्र कमार दीक्षित | वेद विभागाध्यक्ष,<br>वेद वेदांग सं.म.वि. वाराणसी | 8004246395 | sarvayansewakaghi@gmail.com |
| 8. | डॉ. श्यामलेश कुमार तिवारी | सहायक आचार्य,<br>लखनऊ विश्वविद्यालय, लखनऊ | 9415303193 | shyamlesh78@gmail.com |
| 9. | डॉ. कुप्पा गुरू बिल्वेश | व्याकरण विभाग, सं.सं.वि.वि., वाराणसी | 9944412535 | ksgb.ssvv@gmail.com |
| 10. | श्री नितिन आर्य | सहायक आचार्य, व्याकरण विभाग, सं.सं.वि.वि., वाराणसी | 9599392955 | nitingpa1995@gmail.com |
| 11. | डॉ. रंजन लता | सहायक आचार्य, संस्कृत विभाग दीनदयाल दयाल गोरखपुर वि.वि. गोरखपुर | 7906607153 | ranjanjnu13@gmail.com |
| 12. | डॉ. चन्द्रकान्त शुक्ल | सहायक आचार्य, राजकीय स्ना. म.वि. गणीनाथ, मऊ | 8318867067 | chandrakantsanskritam@gmail.com |
| 13. | डॉ. रितेश कुमार पाण्डेय | व्याकरण विभागाध्यक्ष<br>आदर्श सं.म.वि.वृन्दावन, मथुरा | 936821090 | riteshpandey34@gmail.com |
| 14. | डॉ. मधुसूदन मिश्र | सहायक आचार्य, ज्योतिष विभाग, सं.सं.वि.वि., वाराणसी | 9005484655 | msmishraastrobhu@gmail.com |
| 15. | प्रो. चन्द्रकान्ता राय | संस्कृत विभागाध्यक्ष आर्य महिला पी.जी. कालेज, वाराणसी | 8299715803 | chandrakanta.vns@gmail.com |

धन्यवादाः वितीर्यन्ते